# ગઙ્ગાસ્તવઃ

## Gangastava

sanskritdocuments.org

June 29, 2018

# Gangastava

## ગઙ્ગાસ્તવઃ

## Sanskrit Document Information

Text title : gangAstava kalkIpurANe evaM bhaviShye

File name : gangAstavakalkIP.itx

Category : devii, nadI, stotra, devI

Location : doc_devii

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwaa, by PSA EASWARAN psaeaswaran at gmail.coml

Description-comments : shrIkalkipurANe.anubhAgavate bhaviShye tRityA.nshe

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 29, 2018

*sanskritdocuments.org*

# ગઙ્ગાસ્તવઃ

શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ –
શૃણુધ્વં મુનયઃ સર્વે ગઙ્ગાસ્તવમનુત્તમમ્ ।
શોકમોહહરં પુંસામૃષિભિઃ પરિકીર્તિતમ્ ॥ ૧॥

ઋષય ઊચુઃ –
ઇયં સુરતરઙ્ગિણી ભવનવારિધેસ્તારિણી
સ્તુતા હરિપદામ્બુજાદુપગતા જગત્સંસદઃ ।
સુમેરુશિખરામરપ્રિયજલામલક્ષાલિની
પ્રસન્નવદના શુભા ભવભયસ્ય વિદ્રાવિણી ॥ ૨॥

ભગીરથરથાનુગા સુરકરીન્દ્રદર્પાપહા
મહેશમુકુટપ્રભા ગિરિશિરઃપતાકા સિતા ।
સુરાસુરનરોરગૈરજભવાચ્યુતૈઃ સંસ્તુતા
વિમુક્તિફલશાલિની કલુષનાશિની રાજતે ॥ ૩॥

પિતામહકમણ્ડલુપ્રભવમુક્તિબીજા લતા
શ્રુતિસ્મૃતિગણસ્તુતદ્વિજકુલાલવાલાવૃતા ।
સુમેરુશિખરાભિદા નિપતિતા ત્રિલોકાવૃતા
સુધર્મફલશાલિની સુખપલાશિની રાજતે ॥ ૪॥

ચરદ્વિહગમાલિની સગરવંશમુક્તિપ્રદા
મુનીન્દ્રવરનન્દિની દિવિ મતા ચ મન્દાકિની ।
સદા દુરિતનાશિની વિમલવારિસન્દર્શન-
પ્રણામગુણકીર્તનાદિષુ જગત્સુ સંરાજતે ॥ ૫॥

મહાભિષસુતાઙ્ગના હિમગિરીશકૂટસ્તના
સફેનજલહાસિની સિતમરાલસઞ્ચારિણી ।

ચલલ્લહરિસત્કરા વરસરોજમાલાધરા
રસોલ્લસિતગામિની જલધિકામિની રાજતે ॥ ૬॥

ક્વચિન્મુનિગણૈઃ સ્તુતા ક્વચિદનન્તસમ્પૂજિતા
ક્વચિત્કલકલસ્વના ક્વચિદધીરયાદોગણા ।
ક્વચિદ્રવિકરોજ્જ્વલા ક્વચિદુદગ્રપાતાકુલા
ક્વચિજ્જનવિગાહિતા જયતિ ભીષ્મમાતા સતી ॥ ૭॥

સ એવ કુશલી જનઃ પ્રણમતીહ ભાગીરથીં
સ એવ તપસાં નિધિર્જપતિ જાહ્નવીમાદરાત્ ।
સ એવ પુરુષોત્તમઃ સ્મરતિ સાધુ મન્દાકિનીં
સ એવ વિજયી પ્રભુઃ સુરતરઙ્ગિણીં સેવતે ॥ ૮॥

તવામલજલાચિતં ખગસૃગાલમીનક્ષતં
ચલલ્લહરિલોલિતં રુચિરતીરજમ્બાલિતમ્ ।
કદા નિજવપુર્મુદા સુરનરોરગૈઃ સંસ્તુતોઽપ્યહં
ત્રિપથગામિનિ પ્રિયમતીવ પશ્યામ્યહો ॥ ૯॥

ત્વત્તીરે વસતિં તવામલજલસ્નાનં તવ પ્રેક્ષણં
ત્વન્નામસ્મરણં તવોદયકથાસંલાપનં પાવનમ્ ।
ગઙ્ગે મે તવ સેવનૈકનિપુણોઽપ્યાનન્દિતશ્ચાદૃતઃ
સ્તુત્વા ચોદ્ધતપાતકો ભુવિ કદા શાન્તશ્ચરિષ્યામ્યહમ્ ॥ ૧૦॥

ઇત્યેતદૃષિભિઃ પ્રોક્તં ગઙ્ગાસ્તવનમુત્તમમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં પઠનાચ્છ્રવણાદપિ ॥ ૧૧॥

સર્વપાપહરં પુંસાં બલમાયુર્વિવર્ધનમ્ ।
પ્રાતર્મધ્યાહ્નસાયાહ્ને ગઙ્ગાસાન્નિધ્યતા ભવેત્ ॥ ૧૨॥

ઇત્યેતદ્ભાર્ગવાખ્યાનં શુકદેવાન્મયા શ્રુતમ્ ।
પઠિતં શ્રાવિતં ચાત્ર પુણ્યં ધન્યં યશસ્કરમ્ ॥ ૧૩॥

અવતારં મહાવિષ્ણોઃ કલ્કેઃ પરમમદ્ભુતમ્ ।
પઠતાં શૃણ્વતાં ભક્ત્યા સર્વાશુભવિનાશનમ્ ॥ ૧૪॥

ઇતિ શ્રીકલ્કિપુરાણેઽનુભાગવતે ભવિષ્યે તૃતીયાંશે
ઋષિકૃતો ગઙ્ગાસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by PSA EASWARAN psaeaswaran at gmail.com

*Gangastava*
pdf was typeset on June 29, 2018

Please send corrections to *sanskrit@cheerful.com*